[1]उभ । उभय । उभशब्दस्य सर्वनामत्वे प्रयोजनम्---'सर्वनाम्नस्तृतीया च' (२.३.२७/६०८) इति[2] । उभाभ्यां हेतुभ्यां वसति, उभयोः हेत्वोः वसति । [3]उभये । उभयस्मै । [4]उभयस्मात् । उभयेषाम् । उभयस्मिन् ।

डतर, [5]डतम । कतर, कतम । कतरस्मै, कतमस्मै । इतर । अन्य । [6]अन्यतर । इतरस्मै । अन्यस्मै । [7]अन्यतरस्मै ।

[8]त्वशब्दोऽन्यवाची स्वरभेदाद् द्विः पठितः । एकः [9]उदात्तः । [10]द्वितीयोऽनुदात्तः । केचित् तकारान्तमेकं पठन्ति । [11]त्व त्वत् इति द्वावपि चानुदात्तौ इति स्मरन्ति ।

नेम---नेमस्मै । वक्ष्यमाणेन जसि विभाषा भवति । नेमे, नेमाः (१.१.३३/२२६) इति ।

सम---समस्मै[12] । कथं 'यथासङ्ख्यमनुदेशः समानाम्' (१.३.१०/१२८), [13]समे देशे यजेत [14]इति । [15]समस्य सर्वशब्दपर्यायस्य सर्वनामसञ्ज्ञा इष्यते, न सर्वत्र । सिम---सिमस्मै[16] ।

'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम्' (१.१.३४/२१८) (ग.सू. १) । 'स्वमज्ञातिधनाख्याम्' (१.१.३५/२१९) (ग.सू. २) । 'अन्तरं बहिर्योगोपसंव्यानयोः' (१.१.३६/२२०) (ग.सू. ३) । त्यद्, तद्, [17]यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, [18]अस्मद्, भवतु, किम् । [19]सर्वादिः । सर्वनामप्रदेशाः---'सर्वनाम्नः स्मै' (७.१.१४/२१५) [20]इत्येवमादयः ॥

## विभाषा दिक्समासे बहुव्रीहौ । (२८/२९२)

'न बहुव्रीहौ' (१.१.२९/२२२) इति प्रतिषेधं[21] वक्ष्यति । [22]तस्मिन्नित्ये प्रतिषेधे [23]प्राप्ते विभाषेयमारभ्यते । दिशां समासः दिक्समासः । दिगुपदिष्टे समासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनामसञ्ज्ञानि भवन्ति । उत्तरपूर्वस्यै, उत्तरपूर्वायै । दक्षिणपूर्वस्यै, दक्षिणपूर्वायै । दिग्ग्रहणं किम् ? 'न बहुव्रीहौ' (१.१.२९/२२२) इति प्रतिषेधं वक्ष्यति, तत्र न ज्ञायते क्व विभाषा, क्व प्रतिषेधः इति । दिग्ग्रहणे [24]पुनः क्रियमाणे ज्ञायते [25]दिगुपदिष्टसमासे विभाषा, अन्यत्र प्रतिषेधः इति । समासग्रहणं किम् ? समास एव यो बहुव्रीहिः, तत्र [26]विभाषा यथा स्यात् । [27]बहुव्रीहिवद्भावेन यो बहुव्रीहिः, तत्र मा भूत् । दक्षिणदक्षिणस्यै (८.१.१०/२१४५) देहि[28] । बहुव्रीहौ इति किम् ? द्वन्द्वे [29]विभाषा मा भूत् । दक्षिणोत्तरपूर्वाणाम् इति (म. भा. १.१०) '[30]द्वन्द्वे च' (१.१.३१/२२४) इति नित्यं प्रतिषेधो भवति ॥

---

1. उभ उभय न स्तः ह. 2. तृतीयाषष्ठ्यौ यथा स्यातामिति उभयाभ्यां हेतुभ्याम् । उभयोः इत्यधिकम् ह. 3. उभयः ड. 4. उभयस्मै, उभयस्मात् न स्तः फ. 5. डतम नास्ति ग. ह, कतर कतम न स्तः ड. 6. अन्यतम ह. 7. विश्व विश्वस्मै विश्वतः इत्यधिकम् ह. 8. वाक्यमिदं नास्ति फ, त्वशब्दोऽयम् ग. ड. ह. 9. एकोऽत्र ब.ग.ड.ई. 10. एकः ग. 11. त्व नास्ति ड. 12. समे ड, समस्मात् समस्मिन् इत्यधिकम् ह. 13. इति इत्यधिकम् ग. 14. च इत्यधिकम् ग. 15. समशब्दस्य ह. 16. सिमस्मात् ह. 17. यद् नास्ति ई. ह, एतद् नास्ति ई. 18. अस्मद् नास्ति ई. 19. सर्वादीनि ह. 20. ङसिङ्योः स्मात्स्मिनौ (७.१.१५/२१६), आमि सर्वनाम्नः सुट् (७.१.५२/२१७), जसः शी (७.१.१७/२१४) इत्यधिकम् ड. 21. प्रतिषेधो वक्ष्यते क. 22. तस्मिन् नास्ति ग, तत्र ह. 23. प्राप्ते नास्ति ग. 24. तु ह. फ. 25. दिगुपदिष्टे समासे क.ग.ड.ह. 26. विभाषा नास्ति फ. 27. बहुव्रीहिविज्ञानेन ब. 28. देहि नास्ति अ. ह. 29. विभाषा नास्ति अ. 30. वाक्यमिदं नास्ति अ.क.ग.ड.फ.ह.